त्वर्थः। अन्यथा चमेक्रीतीत्यादौ नलोपानुपपत्तेः। (सुपां धातुना) उत्तरपदं धातुमात्रं न तिङन्तम्। कटप्रूः आयतस्तूः। "क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घश्चेति" वार्त्तिकात् समासः। "तिङां तिङा" पिबतखादता। पचतभृज्जतेत्यादि। "आख्यातमाख्यातेन क्रियासातत्ये" इति मयूरव्यंसकाद्यन्तर्गणसूत्रात् समासः "तिङां सुबन्तेन" पूर्वपदं तिङन्तमुत्तरं सुबन्तम्। जहिस्तम्बः। "जहिकर्मणा बहुलमाभीक्ष्ण्ये कर्त्तारञ्चाभि दधातीति" मयूरव्यंसकाद्यन्तर्गणसूत्रात् समासः। अयं षड्विधोऽपि समास, "सह सुपा" इत्यत्र योगविभागेन भाष्ये व्युत्पादितः स्पष्टः शब्दकौस्तुभादौ। अयं भाष्यादिसिद्धतद्भेदं व्युत्पाद्य प्राचीनवैयाकरणोक्तविभागस्याव्याप्त्यादिभिस्तल्लक्षणस्य प्रायिकत्वं दर्शयति"।

"समासस्तु चतुर्द्धेति प्रायोवादस्तथाऽपरः। योऽयं पूर्वपदार्थादिप्राधान्यविषयः स च। भीतपूर्व्यात् सोऽपि रेखागवयादिवदास्थितः"। चतुर्धा अव्ययीभावतत्पुरुषद्वन्द्वबहुव्रीहिभेदात्। अयं प्रायोवादः। भूतपूर्वः इनभूः अयतस्तूः वागर्थाविवेत्याद्यसंग्रहात्। तथा पूर्वपदार्थप्रधानोऽव्ययीभावः। उत्तरपदार्थप्रधानस्तत्पुरुषः सर्वपदार्थप्रधानो द्वन्द्वः। अन्यपदार्थप्रधानो बहुव्रीहिरित्यादि लक्षणमपि प्रायिकम्। उन्मत्तगङ्गं सूपप्रति अर्द्धपिप्पली द्वित्राः कुशपलाशमित्यादौ परस्परव्यभिचारात्। तथाहि उन्मत्तगङ्गमित्यव्ययीभावे पूर्वपदार्थप्रधान्याद्बहुव्रीहिलक्षणातिव्याप्तिरव्ययीभावलक्षणाव्याप्तिश्च। "अन्यपदार्थे च संज्ञायामिति" पा० समासः। सूपप्रतीत्यव्ययीभावे उत्तरपदार्थप्राधान्यात् तत्पुरुषलक्षणातिव्याप्तिरव्ययीभावाव्याप्तिश्च। "सुपः प्रतिना मात्रार्थे" पा० समासः। अर्द्धपिप्पलीति तत्पुरुषे पूर्वपदार्थप्राधान्यसत्त्वादव्ययीभावातिव्याप्तिस्तत्पुरुषाव्याप्तिश्च "अर्द्धं नपुंसकमिति" पा० समासः। एवं पूर्वकाय इत्यादौ द्रष्टव्यम्। द्वित्रा इति बहुव्रीहावुभयपदार्थप्राधान्यात् द्वन्द्वातिव्याप्तिः बहुव्रीह्यव्याप्तिश्च। शशकुशपलाशमित्यादिद्वन्द्वे समाहारान्यपदार्थप्राधान्याद्बहुव्रीह्यतिव्याप्तिर्द्वन्द्वाव्याप्तिश्च स्यादिति भावः। सिद्धान्ते त्वव्ययीभावाधिकारपठितत्वमव्ययीभावत्वमित्यादि द्रष्टव्यम्। अस्मभ्यमेषामित्याह भीतपूर्व्यादित्यादि। रेखागवयादिनिष्ठलाङ्गूलादेर्वास्तवपश्वलक्षणत्ववदेतेषामपि न समासलक्षणत्वम्। बोधकता तु तद्वदेव स्यादिति भावः" वैया०।

शब्दशक्तिप्रकाशिकायाम् अन्यथा समासलक्षणादिकमुक्तं यथा "यादृशस्य महावाक्यस्यान्तस्त्वादिर्निजार्थकैः। यादृशार्थस्य धीहेतुः स समासस्तदर्थकः"। "यादृशमहावाक्योत्तरस्त्वतलादिः स्वार्थस्य यादृशार्थावच्छिन्नविषयताशालिबोधे हेतुस्तादृशं तद्वाक्यं तथाविधार्थे समासः। पाचकादिकन्तु पाककर्त्राद्यर्थकं वाक्यमपि स्वघटकानेकनामलभ्यतादृशार्थकत्वविरहान्न महावाक्यं प्रकृत्यर्थमात्रावच्छिन्नप्रत्ययार्थस्यान्वयबोधं प्रत्ययोग्यत्वं वा प्रकृते वाक्यस्य महत्त्वं वाच्यं तेन उपकुम्भादौ नाव्याप्तिर्न वा नीलघटत्वमित्यादौ नीलघटत्वादिभागेऽतिप्रसङ्गः। क्षीरपायीत्यादिकस्तु प्रकृत्यर्थावच्छिन्नतदर्थस्यान्वयबोधे समर्थोऽपि न प्रकृत्यर्थमात्रावच्छिन्नस्य ततः पानशीलसामान्यस्याप्रत्ययात्। राजन्येव पुरुषभावः प्रतीयते न तु राजपुरुषस्य भावः तद्धितानां प्रकृत्यर्थमात्रान्वितस्वार्थबोधकत्वादतो राज्ञः पुरुषेत्यादिभागे न प्रसङ्गः। पाचं पाचमित्यादिणमन्तभागस्तु स्वार्थावच्छिन्नस्य धात्वन्तरार्थस्यैवान्वयबोधको न तु त्वादिप्रत्ययार्थस्य प्रस्थायेत्यादौ समासव्यपदेशोऽस्त्वव्यादिशब्दसंस्कारप्रयोजनको गौणः" विभजते "स चायं षड्विधः कर्मधारयादिप्रभेदतः। यश्चोपपदसंज्ञोऽन्यस्तेनासौ सप्तधा मतः। "स चायं निरुक्तसमासः कर्मधारयद्विगुतत्पुरुषाव्ययीभावबहुव्रीहिद्वन्द्वभेदात् षड्विधः यश्च कुम्भकारादिरप्युपपदसंज्ञकः समासोऽस्ति तेन समं समासः सप्तविधः। सङ्ख्यानिभनीकाशादीनामिव कारादीनामपि शब्दानामुपपदार्थान्वितस्यैव स्वार्थस्य बोधकतया तथाविधनामान्तरमेव चैतस्य समासान्तराद्विशेषः। ननु यदि षड्विधः सप्तविधो वा समासस्तदास्य पञ्चविधत्वोक्तिः प्राचामसङ्गतेत्यतस्तामुपपादयति"। "पूर्वमध्यान्तसर्वान्यपदप्राधान्यतः पुनः। प्राच्यैः पञ्चविधः प्रोक्तः समासो वामटादिभिः। "कश्चित् समासः पूर्वपदार्थधर्मिकान्वयबोधजनकतया पूर्वपदप्रधान उच्यते यथा प्राप्तजायार्द्धपिप्पलीपूर्वकायादिकस्तत्पुरुषः यथा वा उपकुम्भाद्यव्ययीभावः पुरुषसिंहादिकर्मधारयश्च। कश्चिन्मध्यपदार्थधर्मिकधीजनकतयैव मध्यपदप्रधानो यथा पटानधिकरणप्रतियोगितानवच्छेदकेत्यादिकस्तत्पुरुषः पटस्य नाधिकरणमित्यादिविग्रहे मध्यपदार्थस्यैव विशेष्यत्वात् बहुपदे बहुव्रीहिरेवेत्यस्य तत्पुरुषादेर्बहूनामगर्भत्वाभावे तात्पर्यमित्यग्रे व्युत्पाद्यत्वात्। कश्चिदन्त्यपदार्थधर्मिकधीहेतुत्वादन्त्यपदप्रधानः